# Mangalachandika or Mangalagauri stotram

# શ્રીમઙ્ગલચણ્ડિકાસ્તોત્રં અથવા મઙ્ગલાગૌરીસ્તોત્રમ્

## Document Information

Text title : maNgalachaNDikAstotram

File name : mangalachaNDikAstotra.itx

Category : devii, dashamahAvidyA, stotra, devI, mangala

Location : doc_devii

Proofread by : Gopal Upadhyay gopal.j.upadhyay at gmail.com

Description-comments : Prakruti-Khanda, BrahmaVaivarta Purana (Adhyaya 44 shloka 20-41)

Latest update : September 5, 2013

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 1, 2022

*sanskritdocuments.org*

# શ્રીમઙ્ગલચણ્ડિકાસ્તોત્રં અથવા મઙ્ગલાગૌરીસ્તોત્રમ્

ૐ હ્રીં શ્રીં ક્લીં સર્વપૂજ્યે દેવી મઙ્ગલચણ્ડિકે ।
ઐં ક્રૂં ફટ્ સ્વાહેત્યેવં ચાપ્યેકવિન્શાક્ષરો મનુઃ ॥ ૧॥

પૂજ્યઃ કલ્પતરુશ્ચૈવ ભક્તાનાં સર્વકામદઃ ।
દશલક્ષજપેનૈવ મન્ત્રસિદ્ધિર્ભવેન્નૃણામ્ ॥ ૨॥

મન્ત્રસિદ્ધિર્ભવેદ્ યસ્ય સ વિષ્ણુઃ સર્વકામદઃ ।
ધ્યાનઞ્ચ શ્રૂયતાં બ્રહ્મન્ વેદોક્તં સર્વ સમ્મતમ્ ॥ ૩॥

દેવીં ષોડશવર્ષીયાં રમ્યાં સુસ્થિરયૌવનામ્ ।
સર્વરૂપગુણાઢ્યાઞ્ચ કોમલાઙ્ગીં મનોહરામ્ ॥ ૪॥

શ્વેતચમ્પકવર્ણાભાં ચન્દ્રકોટિસમપ્રભામ્ ।
વહ્નિશુદ્ધાંશુકાધાનાં રત્નભૂષણભૂષિતામ્ ॥ ૫॥

બિભ્રતીં કબરીભારં મલ્લિકામાલ્યભૂષિતમ્ ।
બિમ્બોષ્ટીં સુદતીં શુદ્ધાં શરત્પદ્મનિભાનનામ્ ॥ ૬॥

ઈષદ્ધાસ્યપ્રસન્નાસ્યાં સુનીલોલ્પલલોચનામ્ ।
જગદ્ધાત્રીઞ્ચ દાત્રીઞ્ચ સર્વેભ્યઃ સર્વસમ્પદામ્ ॥ ૭॥

સંસારસાગરે ઘોરે પીતરુપાં વરાં ભજે ॥ ૮॥

દેવ્યાશ્ચ ધ્યાનમિત્યેવં સ્તવનં શ્રૂયતાં મુને ।
પ્રયતઃ સઙ્કટગ્રસ્તો યેન તુષ્ટાવ શઙ્કરઃ ॥ ૯॥

॥ શઙ્કર ઉવાચ ॥

રક્ષ રક્ષ જગન્માતર્દેવિ મઙ્ગલચણ્ડિકે ।
સંહર્ત્રી(સંહર્ત્રિ) વિપદાં રાશેર્હર્ષમઙ્ગલકારિકે ॥ ૧૦॥

હર્ષમઙ્ગલદક્ષે ચ હર્ષમઙ્ગલચણ્ડિકે ।
શુભે મઙ્ગલદક્ષે ચ શુભમઙ્ગલચણ્ડિકે ॥ ૧૧॥

મઙ્ગલે મઙ્ગલાર્હે ચ સર્વમઙ્ગલમઙ્ગલે ।
સતાં મઙ્ગલદે દેવિ સર્વેષાં મઙ્ગલાલયે ॥ ૧૨॥

પૂજ્યા મઙ્ગલવારે ચ મઙ્ગલાભીષ્ટદૈવતે ।
પૂજ્યે મઙ્ગલભૂપસ્ય મનુવંશસ્ય સન્તતમ્ ॥ ૧૩॥

મઙ્ગલાધિષ્ઠાતૃદેવિ મઙ્ગલાનાં ચ મઙ્ગલે ।
સંસાર મઙ્ગલાધારે મોક્ષમઙ્ગલદાયિનિ ॥ ૧૪॥

સારે ચ મઙ્ગલાધારે પારેત્વં સર્વકર્મણામ્ ।
પ્રતિમઙ્ગલવારે ચ પૂજ્યે ત્વં મઙ્ગલપ્રદે ॥ ૧૫॥

સ્તોત્રેણાનેન શમ્ભુશ્ચ સ્તુત્વા મઙ્ગલચણ્ડિકામ્ ।
પ્રતિમઙ્ગલવારે ચ પૂજાં કૃત્વાગતઃ શિવઃ ॥ ૧૬॥

દેવ્યાશ્ચ મઙ્ગલસ્તોત્રં યઃ શૃણોતિ સમાહિતઃ ।
તન્મઙ્ગલં ભવેચ્છશ્વન્ન ભવેત્ તદમઙ્ગલમ્ ॥ ૧૭॥

પ્રથમે પૂજિતા દેવી શમ્ભુના સર્વમઙ્ગલા ।
દ્વિતીયે પૂજિતા દેવી મઙ્ગલેન ગ્રહેણ ચ ॥ ૧૮॥

તૃતીયે પૂજિતા ભદ્રા મઙ્ગલેન નૃપેણ ચ ।
ચતુર્થે મઙ્ગલે વારે સુન્દરીભિશ્ચ પૂજિતા ।
પઞ્ચમે મઙ્ગલાકાઙ્ક્ષૈર્નરૈર્મઙ્ગલચણ્ડિકા ॥ ૧૯॥

પૂજિતા પ્રતિવિશ્વેષુ વિશ્વેશૈઃ પૂજિતા સદા ।
તતઃ સર્વત્ર સમ્પૂજ્ય સા બભૂવ સુરેશ્વરી ॥ ૨૦॥

દેવાદિભિશ્ચ મુનિભિર્મનુભિર્માનવૈર્મુને ।
દેવ્યાશ્ચ મઙ્ગલસ્તોત્રં યઃ શૃણોતિ સમાહિતઃ ॥ ૨૧॥

તન્મઙ્ગલં ભવેચ્છશ્વન્ન ભવેત્તદમઙ્ગલમ્ ।
વર્દ્ધન્તે તત્પુત્રપૌત્રા મઙ્ગલં ચ દિને દિને ॥ ૨૨॥

॥ ઇતિ શ્રી બ્રહ્મવૈવર્તે દ્વિતીયે પ્રકૃતિખણ્ડે
નારદ નારાયણસંવાદે મઙ્ગલોપાખ્યાને તત્સ્તોત્રાદિકથનં નામ
ચતુશ્ચત્વારિંશત્તમોઽધ્યાયે મઙ્ગલચણ્ડિકા સ્તોત્રં સમ્પૂર્ણમ્ ॥

Prakruti-Khanda, BrahmaVaivarta Purana (Adhyaya 44 shloka 20-41)

Proofread by Gopal Upadhyay gopal.j.upadhyay at gmail.com

*Mangalachandika or Mangalagauri stotram*

pdf was typeset on December 1, 2022

Please send corrections to *sanskrit@cheerful.com*